हिमसंस्कृतवार्ताः
दैनिकं ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ताः

हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः

**पञ्चाङ्गम्**
अद्य कालयुक्तः वि.सं. २०८२,
कलियुगाब्धः ५१२६ ग्रीष्म-ऋतुः
सूर्यः उत्तरायणः वैशाखशुक्लत्रयोदशी
वैशाख 26 प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-4 ■ वर्ष-4 ■ अङ्क-191 | 1 | मई 10, 2025 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 वर्तमानस्थितिमभिलक्ष्य भारतीयरेलवेद्वारा जम्मूतः, उधमपुरतः च देहलीं प्रति विशेष-रेलयानानि सञ्चाल्यन्ते

3 -भारत-पाकिस्तानयोः मध्ये प्रचलिते संघर्षे राष्ट्रस्वयंसेवकसङ्घस्य वक्तव्यम्

4 KKSU Ramtek- राष्ट्रियशिक्षानीतेः आत्मा अस्ति 'भारतीयता'- आचार्यशङ्करानन्दः

## सुभाषितम्

**अहिंसा परमो धर्मः,**
**क्लेशजं नाशयेत् हि तम्।**
**कृपया हि जीवितं,**
**सर्वत्र शान्तिमुपजीवति॥**

अहिंसा परम धर्म है जो क्लेश का नाश करती है; कृपा से सभी प्राणी सुखपूर्वक जीवन व्यतीत करते हैं।

# पाकिस्तानेन षड्त्रिंशत् स्थानेषु प्रायः 400 ड्रोन्-यन्त्राणाम् उपयोगेन सूचना

## संग्रहणस्य कृतः दुष्प्रयासः, भारतेन नष्टानि यानानि



**हिमसंस्कृतवार्ताः** - गतशुक्रवासरे भारतीयसेनायाः प्रेसवार्तायां कर्नल कुरैशी व्योमिका सिंहौ च प्रतिपादितवन्तौ यत् पाकिस्तानेन गतरात्रौ लेहतः सिरक्रीक् पर्यन्तं षड्त्रिंशत् स्थानेषु प्रायः चतुःशतं ड्रोन्-यन्त्राणाम् उपयोगेन सूचना संग्रहणस्य दुष्प्रयासः कृतः आसीत् । भारतीय सैनया एतानि पातितानि। भारतीयसशस्त्रसेना एतेषु ड्रोन्-यन्त्राणि गतिज इति काइनेटिक अगतिशील इति नॉनकाइनेटिक उपायैः पातितानि। नवदेहल्यां विशिष्टवार्ताहरसम्मेलने भारतीयसेनायाः कर्नल सोफिया कुरैशी इत्यनया प्रोक्तं यत् पाकिस्तानीसेना सैन्यमूलसंरचनायाः लक्ष्यीकरणस्य अभिप्रायेण सम्पूर्ण-पश्चिमसीमायां भारतीयवायुक्षेत्रस्य अनेकवारं उल्लङ्घनं कृतवती। सा अवदत्, न केवलम् एतत्, ते नियन्त्रणरेखायाः पार्श्वे बृहत्-कैलिबरशस्त्राणि अपि प्रक्षिप्तवन्तः। सा अवदत् यत् एतादृशानां बृहत्-प्रमाणे विमान प्रवेशानां उद्देश्यं वायु-रक्षा-प्रणालीनां परीक्षणं, गुप्तचर-सङ्ग्रहः चास्ति। भारतीयसशस्त्रसैनया पाकिस्तानद्वारा भारतस्य उत्तरपश्चिमक्षेत्रयोः कृताः आक्रमणस्य दुष्प्रयासाः गतरात्रौ विफ़लीकृताः। भारतीयसशस्त्रसैनया पाकिस्तानद्वारा भारतस्य उत्तरपश्चिमक्षेत्रयोः कृताः आक्रमणस्य दुष्प्रयासाः विफ़लीकृताः। समग्ररक्षाविभागमुख्यालयद्वारा प्रदत्तसूचनानुसारं पाकिस्तानेन भारतीयसैन्यस्थानकानि अभिलक्ष्य जम्मू-उधमपुर-पठानकोटानाम् उपरि तथा च अन्ताराष्ट्रियसीम्नः निकटवर्तिनां क्षेत्राणां उपरि आक्रमणस्य दुष्प्रयासाः विहिताः । तत्रैव भारतीयसैनया सर्वे ईदृशाः आक्रमणप्रयासाः पूर्णतया विफलीकृताः । एतदन्तर्गतं कापि प्राणहानिः न सञ्जाता। सीमासुरक्षाबलेन सम्बाक्षेत्रे अन्ताराष्ट्रियासीम्नि सीमोल्लङ्घन-दुष्प्रायसरताः सप्त आतङ्कवादिनः निहताः।पाकिस्तानेन अष्टौ प्रक्षेपकास्त्राणि जम्मूकाश्मीरक्षेत्रयोः सतवारी-सम्बा-आर् एस्पुरा-अर्निया इत्येतानि अभिलक्ष्य प्रक्षेपितानि आसन्। वायव्यरक्षाप्रणाल्या एतानि सर्वाणि वायौ एव नष्टीकृतानि। तत्रैव सीमासुरक्षाबलेन सम्बाक्षेत्रे अन्ताराष्ट्रियासीग्रिसीमोल्लङ्घन-दुष्प्रायसरताः सप्त आतङ्कवादिनः निहताः । अयम् उल्लङ्घनदुष्प्रयासः निदर्शनप्रणाल्या अवलोकितः तथा च सैनया पूर्णतया विफलीकृतः । अस्मिन् दुष्प्रयासे पाकिस्तानसैन्यम् आतंकवादिनां साहाय्यं गुलिकाचालनद्वारा कुर्वद् आसीत्। भारतीयसैनया पाकिस्तानसैन्यस्य धनधारस्थानकस्य महती हानिः कृता । विदेशसचिवः विक्रममिस्त्री उक्तवान् यत् भारतं विषयं प्रसारयितुं न इच्छति भारतेन केवलं आतंकवादिनां स्थानानि एव नष्टीकृतानि। विंगकमाण्डर् व्योमिका सिंह इत्यनया उक्तं यत् भारतं तदेव विषयं न प्रसारयिष्यति यदा पाकिस्तानमपि एतद् सम्मानयति।

# देशे खाद्यान्नस्य पर्याप्तं भण्डारमस्ति- केन्द्रीयकृषिमन्त्री शिवराजसिंहचौहानः




**हिमसंस्कृतवार्ताः।** देशस्य केन्द्रीयकृषिमन्त्री शिवराजसिंहचौहानः एकस्मिन् सन्देशे उक्तवान् यत् देशे पर्याप्तखाद्यान्नभण्डारः वर्तते, येन देशस्य जनैः चिन्ता न करणीया, तेनोक्तं यत् पञ्जाबजम्मूसदृशेभ्यः राज्येभ्यः यदि जनाः युद्धकारणात् पलायनं कुर्वन्ति, तर्हि तेषां सहयोगं समस्तदेशस्य दायित्वमस्ति। तेन स्पष्टीकृतं यत् पञ्चायतीराजविभागः अपि अस्यां दिशि कार्यं कुर्वन्नस्ति। जनाः यत्रकुत्रापि शरणं प्राप्तुं शक्नुवन्ति, तेषां कृते दैनिकवृत्तेः अवसराः पञ्चायतीविभागः परिकल्पयिष्यति।

## देशे गैसस्य तैलस्य च पर्याप्तं भण्डारमस्ति- ओ.एन.जी.सी

भारतस्य ओएनजीसी इति संस्थया स्पष्टं कृतं यत् देशे गैसस्य तैलस्य च पर्याप्तं भण्डारमस्ति, अतः जनाः सामाजिकपटलेषु प्रसरितानां दुष्प्रचारस्य सन्देशानां चिन्तां मा कुर्युः।

## ए.टी.एम यन्त्राणि सम्यकतया चलन्ति

सर्वकारेणोक्तं यत् सञ्चारपटलेषु भ्रामकसन्देशानां प्रसारं जायमानमस्ति यत् धनग्रहणस्य ए.टी.एम यन्त्राणि न चलिष्यन्ति, अतः एतादृशानां सन्देशानां विश्वासः नैव कर्तव्यः,. देशे सर्वत्र ए.टी.एम यन्त्राणि नैरन्तर्येण कार्यावस्थायां सन्ति।

प्रतिदिनं नवीनतमं हिमसंस्कृतवार्ताः दैनिकवार्तापत्रं प्राप्त्यर्थं 7876636263 Watsapp संख्या मध्ये नमो नमः लिखन्तु

To get the latest himsanskritvartah Daily Sanskrit Newspaper every day, write Hello on 7876636263 Watsapp

**सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धिनां कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति**

कार्यालयः
**हिमसंस्कृतम् प्रकाशनम्**
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला, जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः - १७७१११

# रक्षामन्त्री राजनाथसिंहः नवदेहल्याम् उच्चस्तरीय-सभायां त्रिभिः सैन्यप्रमुखैः सह सुरक्षास्थितेः समीक्षां कृतवान्

हिमसंस्कृतवार्ताः - रक्षामन्त्रिणः राजनाथसिंहस्य अध्यक्षतायाम् नवदेहल्याम् उच्चस्तरीयसभायां पश्चिमीय-सीमायाः सुरक्षास्थितेः समीक्षां कृत्वा भारतीयसशस्त्रसेनायाः परिचालनसज्जतायाः समीक्षा जाता। उपवेशने रक्षा प्रमुखः जनरल अनिलचौहानः, सेना प्रमुखः जनरल उपेन्द्र द्विवेदी, एयर चीफ मार्शल अमरप्रीत सिंहः, नौसेना प्रमुखः एडमिरल दिनेश के त्रिपाठी च उपस्थिताः आसन्। सभायां रक्षासचिवः आरके सिंहः अपि उपस्थितः आसीत् । केन्द्रीयगृहमन्त्री अमितशाहः सीमासुरक्षाबलस्य, सीआईएसएफ दलस्य, नागरिकविमाननसुरक्षाव्यूरो (बीसीएएस) इत्यस्य च महानिदेशकैः सह अपि उपवेशनं कृतवान्।

# रक्षाकार्याणां, सुरक्षाबलानाम् आवागमनस्य च सजव-प्रसारणे प्रतिबन्धः

हिमसंस्कृतवार्ताः - सर्वकारेण सर्वाभ्यः वार्तावाहिनीभ्यः, प्राविधिकमञ्चेभ्यः, जनेभ्यः च रक्षाकार्याणां, सुरक्षाबलानाम् आवागमनस्य च सजव-प्रसारणम् अथवा वास्तविकसमये प्रतिवेदनात् दूरमेव स्थातुं परामर्शाः प्रदत्ताः। सामाजिकपटलीयैकस्मिन् सन्देशे रक्षामन्त्रालयेन सूचनाप्रसारणमन्त्रालयस्य पूर्ववृत्तपत्रस्य उद्धरणं प्रददता उक्तं यत् एतादृशीनां संवेदनशीलानाम् स्रोताधारित-सूचनानां प्रकटीकरणेन परिचालनप्रभावशीलतायां समाह्वानं भवितुं शक्नोति, जन-जीवन-हानिरपि भवितुं शक्नोति। मन्त्रालयेन कारगिलयुद्धं, २६/११ आक्रमणं, कन्धारापहरणं च इत्यादीनां पूर्वघटनानां उल्लेखं कृत्वा अकालं प्रतिवेदनस्य समाह्वानं रेखांकितम्।

# वर्तमानस्थितिमभिलक्ष्य

## भारतीयरेलवेद्वारा जम्मूतः, उधमपुरतः च देहलीं प्रति विशेष-रेलयानानि सञ्चाल्यन्ते



**हिमसंस्कृतवार्ताः** - वर्तमानस्थितीः अभिलक्ष्य भारतीयरेलवेद्वारा जम्मूतः उधमपुरतः च देहलीं प्रति विशेषरेलयानानि सञ्चाल्यन्ते। रेलयानसंख्या 04612 यस्मिन् द्वादश अनारक्षिताः तथा च द्वादश आरक्षिताः कोषाः वर्तन्ते गतदिवसे प्रातः पादोनदशवादने जम्मूतः प्राचलत् तत्रैव पादोनैक-वादने उद्यमपुरतः वन्देभारतयानस्य अपि व्यवस्थिता आसीत् । सायं च सप्तवादने एकम् आरक्षितयानं जम्मूतः प्राचलत् ।

# द्ररिद्रेण पाकिस्तानेन पुनः ऋणस्य कृता याचना



**हिमसंस्कृतवार्ताः** - दरिद्रपाकिस्तानस्य आर्थिकस्थितिः दुरावस्थायामस्ति तदपि सः आतंकवादस्य गतिविधिषु संलग्नः भवति, पुनः भारताय युद्धाय प्रेरयति। इदानीं पुनः पाकिस्तानसर्वकारेणं अन्ताराष्ट्रिय सहयोगिनः सम्प्रार्थिताः यत् ते इतोपि अधिकम् ऋणं पाकिस्तानाय यच्छन्तु यतोहि पाकिस्ताने महती हानिः सञ्जाता अस्ति। पाकिस्तानसर्वकारस्य वाणिज्यविभागः सामाजिकसञ्चार पटले एकस्य सन्देशस्य माध्यमेन एतद् लिखितवान् यत् वयम् अन्ताराष्ट्रियसहयोगिनः सम्प्रार्थयामः यत् अस्माकं वित्तीयपणम् अपि निरन्तरं क्षयमुपैति अतः भवन्तः अस्माकं साहाय्यं कुर्वन्तु ।

# दिल्लीविमानस्थानकात् प्रचल्यमानाः अष्टत्रिंशदुत्तरैकशतं विमानसेवाः निरस्तीकृताः



हिमसंस्कृतवार्ताः - दिल्लीविमानस्थानकात् प्रचल्यमानाः अष्टत्रिंशदुत्तरैकशतं विमानसेवाः निरस्तीकृताः। एतासु चतस्रः अन्ताराष्ट्रिय प्रापण सेवाः पञ्च अन्ताराष्ट्रिय-प्रस्थानसेवाः त्रिषष्टिः गृहसेवाः प्राप्तेः षट्षष्टिः प्रस्थानगृहसेवाः च सन्ति।

# आतङ्कवादस्य निवारणाय भारतेन

## अन्ताराष्ट्रियसमुदायानां सशक्तं समर्थनं प्राप्तम्

**हिमसंस्कृतवार्ताः** - भारतस्य दृष्टिकोणेन आतङ्कवादस्य निवारणाय अन्ताराष्ट्रियसमुदायानां सशक्तं समर्थनं प्राप्तम् अस्ति । यतः सः ऑपरेशन सिन्दूरेत्यस्य आरम्भं कृतवान्। अमेरिका, यूके, इजरायल, सऊदी अरब, कतार, यूएई इत्यादयः देशाः भारतस्य स्थितिं समर्थितवन्तः। यूरोपीयसङ्घस्य सप्तविंशति सदस्यदेशाः च एकीकृतं दृढं च वक्तव्यं प्रकाशितवन्तः । अमेरिकीयराष्ट्रपतिः डोनाल्ड ट्रम्पः भारतेन सह एकतां प्रकटितवान्, आतङ्कवादस्य निवारणे तस्य सार्वभौमाधिकारस्य पुष्टिं कृत्वा संयमस्य, अग्रे कूटनीतिकमार्गस्य च आग्रहं कृतवान्। ब्रिटेनस्य विदेशमन्त्री डेविड् लैम्मी इत्यनेन उक्तं यत् भारतस्य आक्रोशस्य उचितकारणं वर्तते, तत्रैव ब्रिटेनस्य पूर्वप्रधानमन्त्री ऋषिसुनकः च प्रतिपादितवान् यत् केनापि देशेन सीमापारतः आतङ्क न सोढव्यम्।



रूसदेशः उभाभ्यां पक्षाभ्यां संयमस्य आह्वानं कुर्वन् स्पष्टं कृतवान् यत् सः सर्वविध आतङ्कवादस्य निन्दां करोति, सैन्यवृद्धेः विषये च अतीव चिन्तितः अस्ति। इजरायल्, अपि भारतेन सह दृढतया स्थितवान् ।

## भारत-पाकिस्तानयोः मध्ये समुत्पन्न-विवाद-कारणात् आईपीएल् पतिस्पर्धायाः आगामिनः सर्वाः स्पर्धाः सप्ताहं यावत् निरस्तीकृताः



**हिमसंस्कृतवार्ताः** - भारतीय क्रिकेट् कण्ट्रोल बोर्ड बीसीसीआई इत्यनेन आईपीएल् पतिस्पर्धायाः आगामिनः सर्वाः स्पर्धाः सप्ताहं यावत् निरस्तीकृताः। अयं निर्णयः भारत-पाकिस्तानयोः मध्ये समुत्पन्न-विवाद-कारणात् स्वीकृतः विशेषतः काश्मीर-सीम्नि सेनयोर्मध्ये युद्धस्थितेः कारणात् अयं निर्णयः स्वीकृतः। बीसीसीआईद्वारा उक्तं यत् अग्रिमा सूचना स्थितेः निरीक्षणानन्तरमेव प्रदास्यते।

# सेनायाः साहाय्यार्थं हिमाचलस्य ३५ सहस्रचालकाः सज्जाः



**हिमसंस्कृतवार्ताः- कार्यालयीय प्रतिनिधिः।** भारत-पाकिस्तानयोः युद्धं देशे आरब्धम् अस्ति। गतद्वि-त्रिदिनानि यावत् प्रचलति तस्मिन् युद्धे भारतीयसेना पाकिस्तानाय कठिनं समयं दत्तवती। देशस्य वायुसेना पाकिस्तानस्य उपरि एतादृशानि आक्रमणानि अकुर्वन् यत् पाकिस्तानस्य स्थितिः दुर्गता अस्ति। यतः युद्धम् आरब्धम् अस्ति, तादृशे सति सर्वविधाः सज्जताः तत्र भवेयुः। समग्रं राष्ट्रं राष्ट्रसेवायाम् उत्साहेन परिपूर्णं वर्तते, सर्वे इच्छन्ति यत् यदि आवश्यकता उत्पद्यते तर्हि ते त्यागं कर्तुं न लज्जन्ते। एतादृश्यां परिस्थितौ राज्यसर्वकारः अपि भविष्यस्य रणनीतिं मनसि कृत्वा अत्र सर्वविधां सज्जतां कुर्वन् अस्ति। सूत्रानुसारम् अस्मिन् सन्दर्भे परिवहनविभागस्य अतिरिक्तमुख्यसचिवस्तरस्य अपि गोष्ठी आयोजिता, अस्याः समागमस्य अनन्तरं मुख्यमन्त्रिणा सह उच्चशक्तिसमितेः गोष्ठ्यां विवरणानि स्थापितानि। एतेषु विवरणेषु ज्ञातं यत् हिमाचलप्रदेशे प्रायः ३५ सहस्र बृहद्वाहन-अनुज्ञापत्रधारकाः सन्ति ये अत्र ट्रक-बसयानानि च चालयन्ति। एतावन्तः चालकाः सन्ति ये कदापि देशस्य सेवां कर्तुं गन्तुं शक्नुवन्ति। यद्यपि एतादृशी स्थितिः कदापि न भविष्यति तथापि युद्धात् पूर्वं एतादृशी सज्जता भवति, हिमाचले अपि एतादृशी सज्जता प्रचलति। भविष्यस्य रणनीत्याः विषये वदन् यदि केनचित् कारणेन सेनायाः कृते चालकानाम् आवश्यकता अस्ति तर्हि हिमाचलप्रदेशः अपि तस्मिन् योगदानं दातुं शक्नोति। अत्र ३५ सहस्रमिताः एतादृशाः चालकाः सन्ति ये ट्रकयानानि अपि च बसयानानि चालयन्ति। एतादृशेषु समयेषु तेषां सेवायाः लाभः प्राप्तुं शक्यते। परिवहनविभागेन एतादृशानि विवरणानि सर्वकाराय प्रदत्तानि सन्ति। एतादृशेषु अवसरेषु देशस्य सेवायै बृहद्- अनुज्ञापत्रधारिणः चालकाः प्रेषयितुं शक्यन्ते इति सर्वकारेण उक्तम्। इदानीं कः गमिष्यति वा न वा, तेषां स्वस्य अधिकारत्वात् एव निर्भरं भवति। परन्तु सर्वकारस्य एतादृशाः सज्जताः सन्ति, एतादृशानाम् अवसरानां कृते सः सज्जः अस्ति। युद्धस्य स्थितिं मनसि कृत्वा परिवहनविभागेन एतादृशानि विवरणानि दातुं कथितम् इति कथ्यते। अस्य विषयस्य अतिरिक्तमुख्यसचिवस्तरस्य चर्चा कृता, अन्ये केचन महत्त्वपूर्णाः विषयाः चापि अत्र चर्चिताः सन्ति। एच आर टी सी बसयानानां विषये अपि चर्चा अभवत् यत् तेषां प्रेषणं कुत्र कर्तव्यम् इति। अधुना कथ्यते यत् पठानकोटं प्रति प्रेष्यमाणानि बसयानानि केवलं जसूरपर्यन्तं प्रेषितानि भविष्यन्ति। एतदतिरिक्तं परिवहनक्षेत्रसम्बद्धेषु अन्येषु विषयेषु अपि चर्चा अभवत्। अत्र अपि दृष्टं यत् यदि युद्धकाले बसयानानां, ट्रकयानानां च आवश्यकता भवति तर्हि तेषाम् अत्र कीदृशी उपलब्धता अस्ति।

# HP Education Department: शिक्षाविभागेन पूर्वनर्सरीशिक्षकाणां नियुक्तिनियमाः निर्धारिताः

हिमसंस्कृतवार्ताः- शिमला। राज्यस्य सर्वकारीयविद्यालयेषु ६२९७ पूर्वनर्सरीशिक्षकाणां नियुक्तिनियमा अपि शिक्षाविभागेन अन्तिमरूपेण निर्धारिताः सन्ति। विद्यालयेषु तेषां नामकरणं Early Childhood Care and Education Tutors इति भविष्यति। एते अध्यापकाः यस्याः कम्पन्याः अन्तर्गतं नियुक्ताः भविष्यन्ति तस्याः एव कर्मचारिणः भविष्यन्ति इति निर्णयः कृतः अस्ति। शिक्षाविभागे कस्यापि प्रकारस्य प्रत्यक्षनियोगो न भविष्यति इति तात्पर्यम्।

अस्य विशेषं वस्तु अस्ति यत् आउटसोर्सिंग कम्पनी तान् प्राथमिकविद्यालयेषु नियुक्तं करिष्यति, यत्र यत्र रिक्तस्थानानि सन्ति। अपि च विद्यालयस्य अवकाशे तेभ्यः किमपि प्रकारस्य वेतनं न दीयते। केवलं दशमासानां वेतनं प्राप्नुयुः इति तात्पर्यम्। तेषु पूर्णं प्रशासनिकं नियन्त्रणं भविष्यति। तात्पर्यम् अस्ति यत् ते सीएचटी, एचटी, सीनियर जेबीटी इत्येतेषां निरीक्षणे कार्यं करिष्यन्ति। तत्रापि उक्तं यत् सर्वकारस्य अनुमोदनं विना कोऽपि अध्यापकः एकस्मात् विद्यालयात् अन्यस्मिन् विद्यालये स्थानान्तरितः न भविष्यति। अस्मिन् कार्यं प्राप्य अध्यापकस्य आयुः २१ तः ४५ वर्षाणां मध्ये भवेत्। कृपया ज्ञातव्यं यत् एते शिक्षकाः राज्यस्य तेषु प्राथमिकविद्यालयेषु प्रदत्ताः भविष्यन्ति यत्र पूर्वनर्सरी कक्षाः प्रचलन्ति। सम्प्रति २५,००० तः अधिकाः बालकाः प्री- नर्सरी- विद्यालये नामाङ्किताः सन्ति, तेषां पालनं जेबीटी शिक्षकैः क्रियते। एतेषु विद्यालयेषु परिचारिकाः नियोक्तुं पृथक् प्रक्रिया अपि प्रचलति। एताः परिचारिकाः बालकानां पालनाय तत्र भविष्यन्ति। एतासां नियुक्तिः समग्रशिक्षायाः अन्तर्गतं क्रियते। एचपीएसईडीसी इत्यनेन आउटसोर्सड कम्पनीभ्यः पदानाम् आबंटनं आरब्धम् अस्ति। आगामिसप्ताहात् अस्मिन् विषये आवेदनग्रहणप्रक्रिया आरभ्यत इति उद्देश्यम्।

### एताः शैक्षणिकयोग्यताः आवश्यकाः

अस्मिन् अभ्यर्थिनः १२ कक्षायां ५०% अंकाः भवितव्याः। एतेन सह नर्सरी शिक्षकशिक्षायां डिप्लोमा, एनसीटीईद्वारा मान्यताप्राप्तः द्विवर्षीयः ईईसीई डिप्लोमा आवश्यकः अस्ति। एतेन सह हिमाचलप्रदेशस्य संस्कृतिविषये सामान्यज्ञानं ज्ञानं च भवितुं महत्त्वपूर्णम्। परन्तु हिमाचले द्विवर्षीयपूर्व-नर्सरी- डिप्लोमाधारकाणां संख्या न्यूना अस्ति। एतादृशे सति कुलासनेषु केचन रिक्तानि एव तिष्ठन्ति इति अपि आशङ्का वर्तते।

## Himachal News - पञ्जाब-किङ्ग्स-दिल्ली-कैपिटल्स्-एते दले हिमाचलात् प्रस्थिताः, विशेष-रेलयानेन देहलीं प्रेषिताः




**हिमसंस्कृतवार्ताः - धर्मशाला।** भारत-पाकिस्तानयोः मध्ये वर्धमानस्य द्वन्द्वस्य कारणेन गुरुवासरे रात्रौ आईपीएल-क्रीडा निरस्ता अभवत् । तदनन्तरं पञ्जाबकिङ्ग्स, दिल्ली- कैपिटल्स् इत्येतयोः क्रीडकाः शुक्रवासरे धर्मशालातः दिल्लीनगरं प्रत्यागतवन्तः। कठिनसुरक्षायाः मध्ये क्रीडकाः धर्मशालातः जालन्धरं यावत् मार्गेण नीताः। इतः ते विशेषयानेन देहलीन प्रेषिताः ।पुलिसाधीक्षिका शालिनी अग्निहोत्री इत्यनया उक्तं यत् सुरक्षायाः कठोरव्यवस्था कृता, क्रीडकानां च समस्यां विना जालन्धरं प्रति परिवहनं कृतम्। जालन्धरतः ते विशेषरेलयानेन देहलीं प्रति प्रस्थितवन्तः । धर्मशालातः जालन्धरं यावत् क्रीडकानां सुरक्षितरूपेण परिवहनार्थं पुलिसैः अतिरिक्तबलानि नियोजितानि आसन्। अस्मिन् काले कस्यापि अप्रियघटनायाः परिहाराय कठोरनिरीक्षणं कृतम् । आईपीएल-क्रीडायाः अस्मिन् सत्रे प्रथमवारं सुरक्षाकारणात् मेलनं निरस्तं जातम् । सम्प्रति IPL अनिश्चितकालं यावत् स्थगितम् अस्ति, अग्रिमस्य मेलनस्य तिथिः अपि न निर्णीता ।

## HPCM - जम्मू-कश्मीरे अध्ययनं कुर्वन्तः हिमाचल-छात्राः सुरक्षितरूपेण स्वगृहम् आनयिष्यन्ते

हिमसंस्कृतवार्ताः - शिमला। उपमुख्यसचेतकः केवलसिंह पठानिया शुक्रवासरे मुख्यमन्त्रिणं सुखविन्दरसिंहसुक्खुं मिलित्वा जम्मू-कश्मीरे विशेषतः श्रीनगरे अध्ययनं कुर्वन्तः हिमाचली-छात्रान् सुरक्षितरूपेण पुनः आनेतुं आग्रहं कृतवान्। एतेषां छात्राणां मातापितरः स्वसन्ततिनां सुरक्षायाः चिन्ताम् अनुभवन्ति इति सः मुख्यमन्त्रीं अवदत्।

सः अवदत् यत् सम्प्रति जम्मू-कश्मीरे प्रायः १०३ छात्राः शिक्षां प्राप्नुवन्ति तथा च भारत-पाकिस्तानयोः मध्ये वर्धमानं विवादं दृष्ट्वा तेषां परिवाराः अत्यन्तं चिन्तिताः सन्ति, बालकानां सुरक्षितं पुनरागमनस्य आग्रहं च कुर्वन्ति। मुख्यमन्त्री उक्तवान् यत् राज्यसर्वकाराय राज्यस्य छात्राणां सुरक्षा, कल्याणं च सर्वोपरि वर्तते। अस्मिन् दिशि राज्यसर्वकारः सर्वसम्भवं सर्वाणि पदानि ग्रहीष्यति इति आश्वासनं दत्तवान्। सः मुख्यसचिवं तत्कालं आवश्यकानि पदानि स्वीकृत्य जम्मू-कश्मीर-सर्वकारेण सह समन्वयं कृत्वा छात्राणां सुरक्षितं पुनरागमनं सुनिश्चितं कर्तुं निर्देशं दत्तवान्।

## भारत-पाकिस्तानयोः मध्ये प्रचलिते संघर्षे राष्ट्रस्वयंसेवकसङ्घस्य वक्तव्यम्



**हिमसंस्कृतवार्ताः ।** भारत-पाकिस्तानयोः मध्ये प्रचलिते संघर्षे राष्ट्रस्वयंसेवकसङ्घेन सम्पूर्णविषये वक्तव्यं प्रकाशितम् अस्ति। एकस्मिन् वक्तव्ये राष्ट्रस्वयंसेवकसङ्घस्य कथनमस्ति यत् पहलगामे निकृष्ट-आतङ्कवादी-घटनायाः अनन्तरं पाकिस्तान-प्रायोजित-आतङ्कवादिनः विरुद्धं निर्णायक-कार्याणि क्रियमाणस्य ऑपरेशन सिन्दूरम् -इत्यस्य कृते भारतसर्वकारस्य नेतृत्वस्य सशस्त्रसेनायाः च हृदयेन अभिनन्दनं क्रियते। हिन्दुतीर्थयात्रिकाणां क्रूरनरसंहारे पीडितपरिवारस्य सम्पूर्णराष्ट्राय च न्यायप्रदानार्थम् एषा कार्यप्रक्रिया सम्पूर्णराष्ट्रस्य आत्मसम्मानं साहसं च वर्धितवती।

### सम्पूर्णः देशः सर्वकारेण सैन्यबलैः सह च तिष्ठति

राष्ट्रस्वयंसेवकसङ्घेन एतदपि उक्तं यत् पाकिस्ताने आतङ्कवादिनः तेषां समर्थनव्यवस्थायाः च विरुद्धं क्रियमाणानि सैन्यकार्याणि देशस्य सुरक्षायाः कृते आवश्यकं अपरिहार्यं च सोपानम् इति अपि वयं मन्यामहे। अस्मिन् राष्ट्रसंकटकाले सम्पूर्णः देशः शरीरेण, मनसा, धनेन च सर्वकारेण, सशस्त्रसेनिकैः च सह तिष्ठति। भारतसीमासु धार्मिकस्थानेषु नागरिकवस्तौ च पाकिस्तानीसेनाद्वारा क्रियमाणानां आक्रमणानां निन्दां कुर्मः, एतेषां आक्रमणानां प्रहारैः ये क्षतिग्रस्ताः अभवन् तेषां परिवारेभ्यः हृदयेन शोकसंवेदनां प्रकटयामः।

### षड्यंत्रं सफलं मा भवतु

अस्मिन् एव वक्तव्ये उक्तं यत् अस्मिन् आह्वानपूर्णे अवसरे राष्ट्रीयस्वयंसेवकसङ्घः सर्वदेशवासिनां कृते आह्वानं करोति यत् ते सर्वकारेण प्रशासनेन च दत्तानां सर्वासाम् सूचनानां पूर्णानुपालनं सुनिश्चितं कुर्वन्तु।

## Online संस्कृतशिक्षणम् आमुखपटले जन्मदिवसोपलक्ष्ये आयोजितायाः संस्कृत-प्रश्नोत्तरी- प्रतियोगितायाः परिणामस्य घोषणा



**हिमसंस्कृतवार्ताः- डॉ. नरेन्द्र राणा।** गतदिवसे Online संस्कृतशिक्षणम् जनसंचार- आमुखपटलसमूहे उत्तरप्रदेशस्य फतेहपुरजनपदस्य संस्कृतप्रचारकस्य आयुष द्विवेदी इत्यस्य जन्मदिवसोपलक्ष्ये आयोजितायाः एकस्याः विशेषप्रतियोगितायाः आयोजनम् अभवत्। संस्कृत-प्रश्नोत्तरी प्रतियोगितायां मध्यप्रदेशात् सत्यम मिश्रः प्रथमस्थानं प्राप्तवान्, द्वितीयस्थाने ओडिशातः नम्रता दोरा, तृतीयस्थाने च उत्तरप्रदेशात् डॉ. महिमा शुक्ला वर्तते। प्रतियोगितायाः पुरस्कारप्रायोजकः उत्तरप्रदेशात् आयुष द्विवेदी, आयोजकश्च गुजराततः राष्ट्रीय संस्कृत प्रचारकः जगदीश डाभी आसीत्। ध्यातव्यं वर्तते यद् Online संस्कृतशिक्षणम् द्वारा प्रतिरविवासरे ऑनलाइन संस्कृत- प्रश्नोत्तरी- प्रतियोगितायाः आयोजनं क्रियते। पुरस्कारप्रायोजकः उत्तरप्रदेशात् आयुष द्विवेदी सर्वेभ्यः विजेतृभ्यः पुरस्कारं दास्यति। तेन सह उत्तराखंडात् संस्कृतरसास्वादः संस्था विजेतृभ्यः प्रमाणपत्रं दास्यति।

# KKSU Ramtek- राष्ट्रियशिक्षानीतेः आत्मा अस्ति 'भारतीयता'- आचार्यशङ्करानन्दः

## कविकुलगुरु- कालिदास- संस्कृत- विश्वविद्यालये

### भारतीयशिक्षामण्डलस्य सायुज्ये त्रिदिवसीयसम्मेलनम् आरब्धम्



**हिमसंस्कृतवार्ताः - नागपुरम्।** कविकुलगुरुकालिदास संस्कृतविश्वविद्यालये भारतीयशिक्षणमण्डलस्य संयुक्तोपक्रमे आयोजितस्य भारतीयदृष्ट्या ३६० डिग्री परिणामोन्मुखशिक्षायाः (Bharatiya Way : Outcome Based 360 degree Education) विषये त्रिदिवसीयसम्मेलनस्य उद्घाटनमभवत्। सम्मेलनं २०२५ तमस्य वर्षस्य मईमासस्य ९ दिनाङ्कात् ११ मईपर्यन्तं सम्पन्नम् भविष्यति। अस्मिन् मुख्यातिथिरूपेण भारतीयशिक्षामण्डलस्य अखिल भारतीयः सङ्घटनप्रमुखः आदरणीयः शङ्करानन्दः उपस्थितः आसीत्। कार्यक्रमस्य अध्यक्षता कुलपतिः प्रो. हरेराम त्रिपाठी अकरोत्। भारतीयशिक्षामण्डलस्य डॉ. धनंजय जोशी, राजेन्द्र अयनातः, विश्वविद्यालयस्य अधिष्ठातारः प्रो. कविता होले, प्रो. ललिता जोशी, प्रो. कृष्णकुमारपाण्डेयः, कार्यशालायाः समन्वयकः प्रो. हरेकृष्ण अगस्ती अपि अस्मिन्नवसरे उपस्थिता अभवन्। कार्यक्रमस्य आरम्भः गणमान्यजनैः दीपप्रज्वलनेन कृतः। परिषदः संयोजकेन प्राध्यापकेन हरेकृष्णागस्तिना प्रास्ताविकं कृतम्। प्रो. अगस्ती स्वीये प्रास्ताविके उक्तवान् यत् भारतीयता राष्ट्रियशिक्षानीतौ प्रतिबिम्बिता अस्ति, अस्याः नीतेः च प्रावधानानां विषये विचारं कर्तुं भारतीयशिक्षायाः सर्वान् पक्षान् परीक्ष्य तदर्थं कार्यरूपरेखां सज्जीकर्तुं च अस्य सम्मेलनस्य आयोजनं कृतम् अस्ति। मुख्यातिथिः शङ्करानन्दः स्वकीये सार्थके उद्बोधने सम्मेलनस्य आयोजनस्य उद्देश्यं प्रकटितवान्। शङ्करानन्दः उक्तवान् यत् एतत् त्रिदिवसीयसम्मेलनं भारतीयशिक्षायाः दिशां दृष्टिकोणं च परिवर्तयिष्यति। प्रत्येकं वचनं तस्य पृष्ठतः भावनां च मनसि कृत्वा राष्ट्रियशिक्षानीतिं कार्यान्वितुम् अतीव महत्त्वपूर्णम् अस्ति। यदि वयं ज्ञानस्य, सैन्यस्य, धनस्य च त्रीन् शक्तीः संयोजयामः तर्हि वयं दृढं विकसितं च भारतं निर्मातुं शक्नुमः। असौ अकथयत् यत् आचार्यस्य आध्यात्मिकभूमिका भवेत् सः वेतनभोगी सेवकः, आचार्यः, आचार्यतः, गुरुः इत्यतः ऋषिस्तरं यावत् यात्रां कुर्यात् एतत् केवलं आध्यात्मिकतां स्वीकृत्य एव भविष्यति। एषा आध्यात्मिकी संस्कृतिः शिक्षाद्वारा एव विकसिता भवितुमर्हति, एषा सत्या भारतीयशिक्षा! आध्यात्मिकभूमिकायुक्ता एषा भारतीयता राष्ट्रियशिक्षानीतेः आत्मा अस्ति। आध्यात्मिकता स्वस्य अन्तः सार्वत्रिकैकतायाः साक्षात्कारः, तस्य माध्यमेन च जगतः हिताय कार्यकरणं वर्तते इति स्वामी विवेकानन्देन उक्तम्। भारतस्य स्थितिः, दृष्टिः च परिवर्तयितुं शक्तिः मूलग्रन्थेषु एव अस्ति। तेषां अध्ययनं कुर्वन्तः शिक्षकाः एव भारतस्य दिशां दृष्टिं च परिवर्तयितुं शक्नुवन्ति। आचार्यशङ्करानन्दः आत्मविश्वासेन उक्तवान् यत् आगामिषु वर्षेषु भारतीयशिक्षायाः कृते एतद् सम्मेलनं क्रीडापरिवर्तकं भविष्यति, यतः इदं सम्मेलनं अस्माकं भारतीयशिक्षायाः सिद्धीकरणस्य उद्देश्यं कृत्वा विचारविमर्शं करिष्यति यत् भविष्ये विश्वस्य अन्येभ्यः देशेभ्यः भौतिकज्ञानम् अध्यात्मं च शिक्षयितुं भारतं गन्तव्यं भविष्यति। असौ गायकरूपेण परिणतः कालिदास- संस्कृत- विश्वविद्यालयस्य अस्य सम्मेलनस्य आयोजने उपक्रमं कृत्वा कुलपतिने प्रो. त्रिपाठीवर्याय धन्यवादं अज्ञापयत्। अध्यक्षीये सम्बोधने कुलपतिः प्रो. हरेराम त्रिपाठी इत्यनेन उक्तं यत्, "भारतीयशिक्षणमण्डलस्य सहकारेण आयोजिते अस्मिन् सम्मेलने राष्ट्रियशिक्षानीतेः विषये विस्तरेण चर्चा भविष्यति, आवश्यककार्ययोजना च निर्मिता भविष्यति। एतत् महत्त्वपूर्णं यत् भारतीयशिक्षणमण्डलेन शिक्षायाः वैश्वीकरणस्य विषये आध्यात्मिकदृष्ट्या चिन्तनं करणीयम्। धर्म- अर्थ- कामैः एतैः त्रिभिः पुरुषार्थैः सह चतुर्थः पुरुषार्थः मोक्षः भारतीयसंस्कृतौ अपि महत्त्वपूर्णं स्थानं धारयति। भारतीयसंस्कृतेः सिद्धान्ताः राष्ट्रियशिक्षानीत्यां निहिताः सन्ति एतत् सम्मेलनं विविधरीत्या शिक्षायां भारतीयत्वस्य प्रकाशनं कार्यान्वितुं च महत्त्वपूर्णं सोपानम् अस्ति।" कार्यक्रमस्य संचालनं सहायकाचार्यः डॉ. सचिन द्विवेदी इत्यनेन कृतम्, धन्यवादमतं च आभासीयमाध्यमेन, दूरस्थकेन्द्रस्य निदेशकः डॉ. अनिलकुमारः अकरोत्। कार्यक्रमे सर्वे विभागप्रमुखाः प्राध्यापकाः कर्मयोगिनः च उपस्थिताः आसन्।

# कुमारभास्करवर्मसंस्कृतपुरातनायनविश्वविद्यालये 'शास्त्रमन्थनम्' इत्यस्यान्तर्गतं अष्टमं तथा च नवमं व्याख्यानम् हिमसंस्कृतवार्ता डॉ.निशिकान्तपाण्डेयः

कुमारभास्करवर्मसंस्कृतपुरातनायन- विश्वविद्यालयस्यसर्वदर्शनविभागेन आयोज्यमानायाः 'शास्त्रमन्थनम्' नामकस्य १०८-व्याख्यानमालायाः अष्टमं तथा च नवमं व्याख्यानम् कविगुरुरवीन्द्रनाथठाकुरस्य जन्मजयन्त्युत्सवद्वारा आभासीयमाध्यमेन सुष्ठुतया सम्पन्नम्।अस्मिन् कार्यक्रमे कविगुरुरवीन्द्रनाथठाकुरस्य जन्मजयन्त्युत्सवोपलक्ष्ये व्याख्यानद्वयस्य आयोजनं जातम्। प्रथमव्याख्याने रवीन्द्रनाथठाकुरस्य औपनिषदिकी दृष्टिः इति विषयमधिकृत्य मुख्यवक्तृत्वमलंकृतवान् त्रिपुराविश्वविद्यालयस्य संस्कृतविभागस्य सहाचार्यः डॉ. विश्वबन्धुमहोदयः। स्वभाषणे अतीव सुष्ठुशैल्या अनेन कविगुरोः औपनिषदिकाः विचाराः समुपस्थापितवन्तः। तत्पश्चात् द्वितीयव्याख्याने रवीन्द्रनाथठाकुरदिशा आध्यात्मिकमुक्तिः इति विषयं स्वीकृत्य स्वभाषणं दत्तवान् कुमारभास्करवर्मसंस्कृतपुरातनाध्ययनविश्वविद्यालयस्य सर्वदर्शनविभागस्य विभागाध्यक्षः डॉ रणजीत कुमार तिवारी महोदयः। तेन अतीव संक्षेपेण कविगुरोः सारभूतमर्थस्य प्रतिपादनं स्वभाषणे विधत्तम्।
कार्यक्रमस्य अध्यक्षस्थानं विश्वविद्यालयस्य कुलपतयः आचार्यप्रह्लाद रा. जोशी महोदयाः समलङ्कृतवन्तः। तेनापि रवीन्द्रनाथठाकुरस्य विषये स्वकीयमतम् उपस्थाप्य छात्राणाम् उत्साहवर्धनं कृतम्।

## भारतस्य नैकक्षेत्रेभ्यः अध्यापकाः, शास्त्रजिज्ञासवः छात्राः, शोधार्थिनः च समुपस्थिता आसन्।

एतेन सह सर्वदर्शनमन्थनपरिषदः अध्यक्षः श्री पुलक उपाध्यायः, सम्पादिका सुश्री जिमि डेका, प्रचारप्रमुखः श्री हरिप्रसन्न अधिकारी, विभागस्य अतिथ्यध्यापकः श्री लिराज काफ्ले, अतिथ्यध्यापिका सुश्री मयूरी काकती च प्रमुखतया उपस्थिताः आसन्। कार्यक्रमस्य आरम्भे निशिता देवी इत्यनया छात्रया मङ्गलाचरणम् कृतम्। तत्पश्चात् सर्वदर्शनविभागस्य सहयकाचार्यया लोपामुद्रागोस्वामी महोदयया सर्वेषां स्वागतं कृतम्। संचालनकार्यं विभागीयशोधच्छात्रेण अतिथि-अध्यापकेन लिराजकाफ्ले महोदयेन संपादितम्। तत्पश्चात् सर्वान् धन्यवादं विज्ञाप्य शान्तिमन्त्रपाठेन कार्यक्रमोऽयं सम्पन्नः।

# संस्कृतं संस्कृतिः च- राजीवगान्धिविश्वविद्यालये द्विदिवसीय अभ्यासकार्यशालायाः भव्यं प्रारम्भः

**हिमसंस्कृतवार्ताः डॉ. निशिकान्तपाण्डेयः।** "संस्कृतं संस्कृतिः च परम्परायाः भारतीयज्ञानपरम्परायाम् अन्तर्निहितं विज्ञानराशिम् अन्वेषयन्तः" इत्यस्य नाम्नि द्विदिवसीया संस्कृताभ्यासकार्यशाला, या राजीवगान्धि- विश्वविद्यालयेन केन्द्रीय- संस्कृत- विश्वविद्यालयेन सह संयोज्य आयोजिताऽभवत्, सा २०२५ तमे वर्षे मईमासस्य सप्तमे दिनाङ्के आरब्धा। उद्घाटनसत्रे विद्वत्सभाषणानि, सांस्कृतिकप्रस्तुतयः, विवेकानन्द- केन्द्रशिक्षण- महाविद्यालय- निर्जुलीशाखायाः छात्रेभ्यः च विश्वविद्यालयीयभागभागितं च दृष्ट्वा समारम्भः अतीव उत्साहपूर्णः अभवत्। समारम्भः राजीवगान्धिविश्वविद्यालयस्य कुलगीतेन, दीपप्रज्वलनेन, च मणमि गाम्लिन इत्यस्याः छात्रायाः (वि. के. वि. निर्जुली) आकर्षकं मङ्गलाचरणनृत्यं च द्वारा आरब्धः। डॉ. एन. टी. रिकम, विश्वविद्यालयस्य कुलसचिवः, स्वागतभाषणं दत्तवान्। सः भाषणे भारतस्य समृद्ध- भाषिक- सांस्कृतिक- परम्परायाः संरक्षणस्य संवर्धनस्य च आवश्यकता अधिगृह्य, संस्कृतभाषायाः संस्कृतेः च आधुनिके सन्दर्भे महत्त्वं प्रकाशयत्। कार्यशालायाः स्वरूपं ध्येयञ्च मोयिर रिबा, (शैक्षिक- प्रशासनिक- समन्वयकः, दूरशिक्षाकेन्द्रे) वक्तुं पर्यवर्तत्। प्रो. प्रह्लाद आर. जोशी, कुलपतिः कामरूपीय- भारतीयविद्यापीठः च संस्कृतविश्वविद्यालयः (नलबारी, असम), उद्घाटनभाषणं दत्तवान्, यत्र सः आधुनिकभारतसन्दर्भे संस्कृतशिक्षायाः अनिवार्यता विस्तरेण विवृणोत्।
माननीयः सभाध्यक्षः टेसम पोंगटे महोदयः अवदत् यत् अरुणाचलप्रदेशसर्वकारस्य सक्षमनेतृत्वे मातृभाषायाः शिक्षायाः प्रारम्भः जातः, किन्तु क्षेत्रस्य पारम्परिकाणां 'शामानिक- जप' भाषाणां पुनर्जीवनस्य आवश्यकता इत्यपि सः उल्लिख्य सम्यगुपदिष्टवान्। प्रो. आशन ऋड्डिः, दूरशिक्षाकेन्द्रनिदेशकः, कृतज्ञतावाक्यैः उद्घाटनसत्रं समापनं कृतवान्। राष्ट्रगानं पश्चात् अल्पोपाहारसमयः आसीत्। अनन्तरं "अरुणाचलप्रदेशे संस्कृतशिक्षायाः आवश्यकता" इत्यस्मिन् विषयवस्तुनि एकं विमर्शपर्वम् अभवत्। अस्मिन् चर्चासत्रे प्रो. प्रह्लाद जोशी, डॉ. वी. के. मिश्रः, प्रो. ओकन लेगो, डॉ. अरुणकुमारपाण्डेयः इत्येते वक्तारः सम्मिलिताः। प्रो. जोशी महोदयः संस्कृतभाषायाः इतिहासं, तस्य प्रारम्भं, च मैकालेयस्मिन् १८३५ तमे भाषणानन्तरं तस्य अपगमनं च विवृणोत्। प्रो. ओकन लेगो महोदयः अरुणाचलप्रदेशे संस्कृतशिक्षायाः महत्त्वं प्रतिपादितवान्। डॉ. मिश्रः तु भाषायाः व्याकरणरचनायाः सौष्ठवेन च चार्ल्स बैबेजादयः उन्नविंशतिशतकीयतर्कशास्त्रज्ञाः आकर्षिताः सन्ति इत्यपि व्यक्तं कृतवान्। संस्कृतव्याकरणस्य आधुनिकतर्क- गणनात्मकविचारेषु सम्भाव्यप्रभावः अपि समुल्लिखितः। एतेषां वक्तव्येभ्यः अनन्तरं टिङ्कुदेवी, कार्यशालायाः सहसमन्वयिका, या च दूरशिक्षाकेन्द्रे संस्कृतशिक्षाकेन्द्रे शिक्षिका अस्ति, सा 'भाषापरिचय' इत्यस्मिन् अन्तर्गतं संस्कृतभाषायाः मूलतत्त्वानि सहभागिभ्यः अवगतवती। दिनस्य समापनं 'भाषाक्रीडा' इत्यनेन अभवत्। अयं कार्यक्रमः नीलकमलपण्डितः (दारङ्गमहाविद्यालये सहप्राध्यापकः), ऋतुपर्णा शर्माणिता देवी च (कामरूपीयभारतीयविद्यापीठस्य शोधार्थिन्यः) इत्येतेषां नेतृत्वेन सञ्चालितः। अनेन संस्कृतभाषायाः अधिगमे 'क्रीडया सह शिक्षणम्' सुफलमभवत्। राष्ट्रगानस्य घोषेण दिनस्य समापनम् अभवत्। अयं कार्यक्रमः २०२५ तमे वर्षे मईमासस्य अष्टमे दिनाङ्के ओजू- मिशन- विद्यालये (नाहरलागुन) छात्रेभ्यः संस्कृताभिमुखीकरणं द्वारा अग्रे अपि चालितुं नियोजितः अस्ति।